শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী তিরুমলৈ অনন্তার্যস্বামি ৱিরচিতা

# ॥ শ্রীগোদাচতুঃশ্লোকী ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীগোদাচতুঃশ্লোকী ॥

অখিলাত্ম গুণাৱাসং অজ্ঞান তিমিরাপহম্।
আশ্রিতানাং সুশরণং ৱন্দেঽনন্তার্য দেশিকম্॥

শ্রীমদ্ রামানুজাচার্য শ্রীপাদাংভোরুহদ্ৱযম্।
সদুত্তমাঙ্গ সন্তার্যম্ অনন্তার্যমহং ভজে॥

নিত্যা ভূষা নিগমশিরসাং নিস্সমোত্তুঙ্গৱার্তা
কান্তো যস্যাঃ কচৱিলুলিতৈঃ কামুকো মাল্যরত্নৈঃ।
সূক্ত্যা যস্যাঃ শ্রুতিসুভগযা সুপ্রভাতা ধরিত্রী
সৈষা দেৱী সকল জননী সিঞ্চতাং মামপাঙ্গৈঃ॥ **1**॥

মাতা চেত্তুলসী পিতা যদি তৱ শ্রীৱিষ্ণুচিত্তো মহান্
ভ্রাতা চেদ্যতিশেখরঃ প্রিযতমঃ শ্রীরঙ্গধামা যদি।
জ্ঞাতারস্তনযাঃ ৎৱদুক্তিসরসস্তন্যেন সংৱর্ধিতাঃ
গোদা দেৱি ! কথং ৎৱমন্যসুলভা সাধারণা শ্রীরসি॥ **2**॥

কল্পাদৌ হরিণা স্ৱযং জনহিতং দৃষ্টেৱৱ সর্ৱাত্মনাং
প্রোক্তং স্ৱস্য চ কীর্তনং প্রপদনং স্ৱস্মৈ প্রসূনার্পণম্।
সর্ৱেষাং প্রকটং ৱিধাতুমনিশং শ্রীধন্ৱিনৱ্যে পুরে
জাতাং ৱৈদিকৱিষ্ণুচিত্ততনযাং গোদামুদারাং স্তুমঃ॥ **3**॥

আকূতস্য পরিষ্ক্রিযামনুপমামাসেচনং চক্ষুষোঃ
আনন্দস্য পরংপরামনুগুণামারামশৈলেশিতুঃ।

তদ্দোর্মধ্য কিরীটকোটিঘটিত স্বোচ্ছিষ্ট কস্তূরিকা
মাল্যামোদসমেধিতাত্মৱিভৱাং গোদামুদারাং স্তুমঃ ॥ **4** ॥

স্বোচ্ছিষ্টমালিকাবন্ধ গন্ধবন্ধুরজিষ্ণৱে।
ৱিষ্ণুচিত্ততনূজাযৈ গোদাযৈ নিত্যমঙ্গলম্ ॥ **5** ॥

মাদৃশাকিঞ্চনত্রাণ বদ্ধকঙ্কণ পাণযে।
ৱিষ্ণুচিত্ততনূজাযৈ গোদাযৈ নিত্যমঙ্গলম্ ॥ **6** ॥

শ্রীমত্যৈ ৱিষ্ণুচিত্তার্য মনোনন্দনহেতৱে।
নন্দনন্দন সুন্দর্যৈ গোদাযৈ নিত্যমঙ্গলম্ ॥ **7** ॥

কর্কটে পূর্ৱফল্গুন্যাং তুলসীকাননোদ্ভৱাম্।
পাণ্ড্যে ৱিশ্ৱম্ভরাং গোদাং ৱন্দে শ্রীরঙ্গনাযকীম্ ॥ **8** ॥

॥ ইতি শ্রীগোদাচতুঃশ্লোকী সমাপ্তা ॥